PRACYAVANI GOPAL CHUNDER LAW
MEMORIAL TEXT SERIES

Vol. 5

THE
BHŪPA-ŚATAKA OF RĀGHAVA VĀCASPATI BHATTĀCĀRYA

critically edited for the first time with an Introduction in English, Appendices, etc.

BY

Prof. Dr. JATINDRA BIMAL CHAUDHURI

Ph D., (London), F.R.A.S., (London), B.E.S.

of Presidency College, Calcutta and Calcutta University ;

Jt. Secretary, PRACYAVANI

CALCUTTA

1946

Published by
Dr. J. B. Chaudhuri

PRACYAVANI
3, Federation Street, P. O. Amherst Street, Calcutta

Available at:—

MEHER CHAND LACHHMAN DAS
Jain Street, Said Mitha Bazar, Lahore

ORIENTAL BOOK AGENCY
15, Shukrawar Peth, Poona

CHUCKERVERTY, CHATTERJEE & CO.
15, Bankim Chatterjee St., Calcutta

DAS GUPTA & CO.
54/3, College Street, Calcutta

and from the

PRACYAVANI
3, Federation Street, Po. Amherst Street,
Calcutta.

015.1
N46
9974
SANSKRIT VIDYA
9974
TIRUPATI.
LIBRARY

DEDICATED TO

DR. BIMALA CHURN LAW, M.A., B.L., Ph.D.

D.LIT., F.B.B.R.A.S., F.R.A.S.B., etc.

President:

PRACYAVANI

INTRODUCTION

The present edition is prepared from a rare manuscript of the work at present preserved at the Bhandarkar Oriental Research Institute, viz. No. 537 of 1891-95 (vide Descriptive Catalogue, vol. 13. Part II, No. 470). The name of the work reveals that the number of verses in it should have been limited to one hundred only. Therefore, if the number of verses as at present given (i.e 126), be aceepted as right, 26 verses are to be accounted for as interpolations. But as the manuscript is defective and verses 12 —(some portion of) 19 and (portion of) V. 72—(some portion of) V. 82 are missing, we cannot be very sure about the nature of this disproportion.

The name of the poet, namely, Rāghava Vācaspati Bhaṭṭācārya, is presumably a Bengali one. At the present stage of our knowledge, however, we are unable to fix up the exact date of the poet or to identify him. But as the manuscript is dated 1800 A.D., there is no doubt that the poet flourished before that date.

We cannot be sure about the authenticity of the authorship of the verses as Rāghava himself says that the verses were āsādita or āpādita by him, evidently for the gratification of his patron. We have not, however, as yet been able to locate any of the verses in any anthology or trace any to an original source.

Subject-matter of the work.

The work is exclusively devoted to the description of a king as the title 'Bhūpa-śataka' shows but unfortunately no particular king is mentioned by name. In this work the manifold qualities of a king, his personal grace, charitable disposition, heroism and the consequent repurcussions on his enemies and their wives, his horses, elephants, sword, etc. etc. are beautifully described. In the third verse the poet praises the king for having Goddess Lakṣmī in his own abode, Sarasvatī in his mouth, Caṇḍikā in his arms, holy feet of Śiva in his mind and a galaxy of paṇḍitas in his court. In the fifth verse, the fame of the king is described. It is said here that Brahmā who resides on the navel-lotus of Nārāyaṇa has to experience a world of difficulties on account of the rise of the moon in the form of the king's fame as the lotus closes down at

its sight and consequently he (Brahmā) is encased within the lotus itself. Nārāyaṇa's Consort Lakṣmī is, however, very much delighted as on account of the disappearance of Brahmā she can now freely dally with her beloved Lord. In the tenth verse the prowess of the king is compared to a light. Thus the clouds high above are said to be the collyrium of the king's fame, the earth itself is the lamp containing oil, the tree of wishes (Kalpavṛkṣa) its wick, the sea its oil and the sun the lustre of the light ; the dread of his enemies is the darkness behind the light (i. e. the enemies always remain hidden and do not dare come forward) and the enemies are the insects flocking into it for courting death only. The description in verse 70 of the moon of the king's fame originating from the sea of his gifts is really enjoyable (according to Shastric injunctions, while making gifts, some water is offered as a preliminary to the real gifts. As the king went on making constant gifts,a vast sea came into being thereof). In V. 83, the large knife of the king is aptly compared to a female serpent and in V. 84 his sword to a snake.

Rhetorical excellence of some of the verses.

Verses 23-24 serve as beautiful instances of the figures of speech Rūpaka and Parisaṃkhyā respectively; verses 33-34 of Śleṣa and V. 126 of Anuprāsa or alliteration.

Description of the MS.

Substance: country-made paper. Character: Devanāgarī. Handwriting: bold and legible. Verse-numbers marked with pigment. Age: 1800 Saṃvat i. e. 1744 A.D. Size 9½" X 5" inches. Extent: 18 leaves; 7-8 lines to a page; 25—28 letters to a line. Complete but defective: VV. 12—(some portion of) 19 and (portion of) V. 72—(some portion of) V. 80 missing. *Post-colophon Script:*

लिखितं बुदैलालेन पुस्तकमिदम्। संवदष्टादशे शतके (?) आषाढीपूर्णिमातिथौ।
लिपीकृतमिदं ग्रन्थमुदैलालद्विजन्मना॥

VERSE-INDEX

अन्धा गन्धार	२६	त्वद्वेतरडैः	८८
अश्वत्थामा	३४	दानं समानं	११६
अहो नायं	७०	दिवि कल्प	११७
आकर्षस्थल	६	द्विषद्भूपालानां	८४
आकीर्णा	३३	देव त्वत्कर	८५
आक्रान्तुं	६७	दीपो युष्मत्	१०
आ समुद्रान्	१११	देव त्वत्कीर्ति	५
इहारण्ये मन्ये	३१	देव श्रीमत्	५६
उत्कीर्णायान्तु	६३	देवाकर्णय	८१
कान्ताः कान्तार	३८	देवे साधयितुं	६८
कान्ते पूर्णेन्दु	४५	दृगम्भोजे	६४
कान्त्योच्चं देव	७	धावत्सु	८६
कार्श्यं तापस	२४	न दुर्गायां	५८
कियान् भूभागो	८७	नाथ त्वत्पाणि	८
कीलालीयन्ति	६	नाम्भोजं	५३
कुम्भीन्द्रै	२	निजाङ्के	६२
कोदण्डे	३५	निन्दति चन्दन	१०६
खण्डिताः खल	१२६	निर्याता रति	३०
चकोरा इव	११४	निराहारा	५७
चकोराणां	५०	नूनमियं	१०८
चलच्चपल	१००	नेपालाचल	६२
चित्तं न्याय	११८	नो कान्ताहृदयं	४३
जाने श्रीमत्	५६	पद्मा सद्मनि	३
तेषां द्वारि	६१	परितस्तारा	१०६
त्वत्कीर्त्या	३६	पूरस्त्वं करुणा	२३
"	६८	पूर्णे भूप	११
त्वत्खड्गाशनिना	७१	प्रत्यक्-पूर्वाद्रि	११३
त्वत्प्रतापानलै	११६	प्रोद्गच्छद्वाजि	८३
त्वत्प्रतीप	१०२	भयतस्तवारि	१२२
त्वद्वेतरडवरा	६०	भवदसिपा	१०५
त्वदीय-प्रस्थान	६१	भवद्रिपु	६६
त्वदीयप्रस्थाने	२७	भास्वन्माणिक्य	४८

भुजाने त्वत्	२६	वाजि ते	८६
भूप त्वत्करवाल	१०७	वितरति तव	१२३
भूप त्वदसि	१२४	विपिने भव	१०४
भूप तावक	१०३	विप्रादीननु	१
भूपालाः कति	६६	विशन्त्यः कान्तारे	६०
भूमिपाल	४	वीणावादन	२२
मता कल्पलता	११२	वीर त्वद्भुज	३६
मन्दो दिनकरो	११५	शतकं सदर्थं	१२७
मन्ये भूपाल	१२५	श्रान्ताः कान्तार	३७
मिथ्याकर्ण्य	४२	श्रीमत्प्रोन्नत	२५
मुखं चन्द्रभ्रान्त्या	८६	श्वसन्त्यः	४७
मुहुर्मूर्छाशैत्यं	५१	संकल्पेऽनल्प	६५
मूकः सुरतरु	११०	संख्यावन्तो	६४
यद्द्वारि	४१	सत्कोदण्डशरो	२१
यशस्तुहिन	१०१	सत्पद्मोन्नति	६६
यशोदयालि	१२०	समन्ताद्वर्धन्त्या	६३
यस्मादुल्लसति	२०	सम्यक् पालयसे	७२
युष्मत्खड्गानु	८२	साङ्कर्यदुर्नि	६६
युष्मद्वैरि	४०	सुभक्ते विद्वेषो	५२
”	४६	सुमित्रात्मज	१२१
”	५५	सुरद्रुः	६५
लाटी पाटीर	२८	स्नाता मेघजलैः	५४
वक्षोजं यान्ति	४४	स्मितश्रीर्मु	३२

GOPAL CHUNDER LAW
MEMORIAL
TEXT SERIES VOL. IV

श्रीराघव-वाचस्पति-भट्टाचार्य-विरचितं

भूपशतकम्

डक्टर—श्रीयतीन्द्रविमलचतुर्धुरीणेन संस्कृतम्

श्रीगणेशाय नमः

विप्रादीननुमोदयन् प्रतिदिनं वेदोदितानाचरन्
भूपालान् बलिनो विपक्षमिलितानामूलमुन्मूलयन्।
कीर्तिं कार्त्तिक-यामिनीशजयिनीं लोकेषु विस्तारयन्
दीनान् सम्परिपालयन् क्षितितलं त्वं वीर विद्योतय ॥१॥

कुंभीन्द्रैर्वाजिवृन्दैर्नरपतिनिवहैः सद्रथानां समूहै-
र्दिव्यै रत्नैरनेकैरगणितगुणिभिः सेव्यमानः समंतात्।
देवासक्तोऽनुरक्तो नयविदि महसा ध्वस्तकन्दर्पदर्पो
जीयादाकल्पमुर्वीतिलकवर भवांल्लालयन् भूमिपालान् ॥२॥

पद्मा सद्मनि शारदापि वदने दोर्दण्डसन्मण्डले
चण्डी खण्डितवीरवृन्दनिपतन्मुण्डावलीमण्डिता।
चित्ते चारुणि चन्द्रचूडचरणौ रम्यौ तवाऽऽस्तां सदा
प्रोद्यत्पण्डितमण्डली सदसि ते भूमण्डलाखण्डल ॥३॥

भूमीपाल भवत्प्रतीपनृपवद् भिक्षाटनप्रोद्यतो
यौष्माकीणकृपाकटाक्ष इव चोपासन्नकल्पद्रुमः।
युष्मत्-कीर्ति-हिमांशुवाञ्छकिसरित्कैलासगौराकृति-
र्युष्मद्वैरिवदेव किं च जटिलः कोऽप्यस्ति देवस्तुतः ॥४॥

देव त्वत्कीर्तिचन्द्रे विलसति सततं शौरिनाभीसरोजं
धामाम्भोजप्रभूते मुकुलितमभवत्तेन जातेऽन्तराले[1]।
निर्व्रीडं क्रीडमाना जलनिधितनया केशवेनाहि नित्यं
युष्मत्कल्याणराशिं कलयतु कलितानन्दसन्दोहसारा ॥५॥

---

1 M. राये।

कीलालीयन्ति भूमीश्वरवरनिवहे प्रीतिभाजो दयार्द्रा
दम्भोलीयन्ति दुष्टक्षितिपतिततिषु प्रोल्लसत्कोपरक्ताः ।
पञ्चास्यीयन्ति युष्मद्रिपुकरिनिकरे[1] चारुचाञ्चल्यशीलाः
कन्दर्पीयन्ति कान्तासमुदयहृदये देव युष्मत्कटाक्षाः ॥६॥

कान्त्योक्षं(?) देव भूमीरुहशिरसि लसत्-स्वच्छगुच्छप्रसूनं
नूनं भूमीन्द्र तस्य प्रणमनविषयोपायमापादयन्त्यः ।
प्रोद्यत्सङ्गीतभङ्गी-जितसुरगणिकाः किञ्च वीणाप्रवीणाः
स्वर्वारास्ते(?)विशालां सपुलकमतुलां दानगाथां गृणन्ति ॥७॥

नाथ त्वत्पाणिपाथोमुचि किरति परं रत्नधारासमूहं
मुक्ताभिर्बीजरूपा करिवररदनैरङ्कुराभा व्यतानि(?) ।
कैलासाद्यैर्दलाढ्या विकसितकुसुमा तारकाभिः समन्तात्
सेयं त्वत्कीर्तिवल्ली विलसति फलिता[2] चन्द्रबिम्बेन मन्ये ॥८॥

आकर्षस्यलकांतमाशु हरसे चीनांशुकं कौतुकात्
काश्मीरं प्रददासि किञ्च तनुषे मध्यप्रदेशे करम् ।
काञ्चीमञ्चसि चोलकोशलविहारं चांगमप्युत्कलं
मायामुज्जयिनीं जयस्यनुमतस्तेन त्वमुर्वीपतिः ॥९॥

दीपो युष्मत्प्रतापो विलसति सततं कज्जलं मेघसंघ-
स्तैलाधारो धरेयं सुरवरशिखरी वर्तिरुच्चैश्चकास्ति ।
तैलं तावत् समुद्राः प्रसरति परितश्चण्डरश्मिः प्रकाशो
लोके भोत्यन्धकारो विगलति[3] नृपते वैरिसंघाः पतङ्गाः ॥१०॥

पूर्णं भूप भवत्सुकीर्तिपयसा ब्रह्माण्डभाण्डं सर-
स्तारास्तत्र वसन्ति हंसनिकराः शैवालमम्भीधरः ।
खं नीलोत्पलमुन्नतस्तव जयस्तंभो मृणालं प्रभो
शीतांशुर्मकरन्दराशिरलिभिर्युक्तः कलङ्कच्छलात् ॥११॥

देवत्व ... ...
.....शोभितकरा भान्त्यर्थिनो भूसुराः ।
यद्दानात् प्रभवन्ति याचकगणाः के के न देवद्रुमा-
स्तस्योर्वीश करस्य केन तुलनामाप्नोतु कल्पद्रमः ॥१९॥

---

1 M. युष्मकरद्विपुनिकरे । 2 M. लित । 3 M. लित ।

यस्मादुल्लसति प्रतापतपनः पद्मार्थिनां सद्मसु
प्रोद्यत्कुञ्जरवाजिराजिरनिशं सन्निःसरत्यर्थिषु ।
निर्गच्छन्मधुपं रवेर्विकसितं सायान्तपद्मालयं
प्राप्तुं पाणितलस्य तस्य तुलनां शक्तं कुतः सारसम् ॥२०॥

सत्कोदण्डशरो भवत्करवरः सत्कीर्तिचन्द्राकरो
रत्नासारवरस्तनोति विदुषां मौनेन पद्मावलिम् ।
गर्जन् योऽम्बु ददाति हन्ति कमलं किञ्च द्विजेशश्रियं
धत्ते निःशरकार्मुकं स हि घनो ब्रूमः कथं त्वत्[1]समः ॥२१॥

वीणावादनकौतुकेन भवता संरक्षिताग्रा नखा-
श्चत्वारस्त्वपरैर्निकृन्तितनखाग्रैरेव मन्ये किल ।
संजातः कुमुदप्रकाशनपटुर्ज्योत्स्नावलीवन्दितो
भूमीपाल यतो हि षोडशकला[2] [पूर्णस्त]मीकामुकः ॥२२॥

पूरस्त्वं करुणारसस्य परशुस्तृष्णालतायास्तरिः
संसारार्णवलंघनस्य सुमहानस्ताचलोऽसत्कृतेः ।
सन्तोषस्य हि सागरस्त्वमवधिः सत्पौरुषस्य प्रभुः
सर्वस्यापि महीभुजो नृपवरासि त्वं गुणस्याकरः ॥२३॥

काश्यं तापस एव केलिसमये कान्तासु मिथ्यावचः
स्कन्धेष्वेव धरामरस्य हि गुणच्छेदः कलङ्को विधौ ।
दारिद्र्यं विपदां प्रजासु पतनं गर्तेषु चौर्यं श्रुता-
वुर्वीं श्रीमति शासतीश कलये वेतण्डगण्डे मदः ॥२४॥

श्रीमत्प्रोन्नतसौधवर्तिमणयः स्फीता नभोदर्पणे
भूमीन्द्र प्रतिबिम्बिता हि परितस्तारागणास्तर्कये ।
यस्तत्र प्रतिबिम्बितस्तु कलसाकारो मणिर्हीरकं
संयुक्तः स च भाति नीलमणिना पूर्णस्तुषारद्युतिः ॥२५॥

भूजाने त्वत्प्रयाणे किमु न[मति]मही लज्जया वेपमाना
भेरीभांकारकोलाहलचलदुदधि-प्रोच्छलद्वीचिचेलैः ।
प्रत्यक्पूर्वाद्रिभास्वत्कुचयुगमभितो गोपयन्ती समन्ता-
द्दिग्योषा भाति धूलीपटलपटवृता किञ्च संकोचशीला ॥२६॥

---

1 M. तत् । 2 M. करा ।

त्वदीयप्रस्थाने बहलबलभारैः क्षितिपते
कुतो जीव्यात् सोऽयं व्यतिदलितमौलिः फणिपतिः।
चलद्युष्मद्वाजि-प्रकर-खुरपातप्रचलितै
रजोवृन्दैर्धा यदि सपदि न स्याद्वसुमती ॥२७॥

लाटी पाटीरपङ्कं कलयति[न]दशाऽभूत् कृशाङ्गी कलिङ्गी
कार्णाटी शीर्णसाटी पतिमतिमलिना मालवी लालपीति।
खर्जूरीं गुर्जरी च प्रविशति वनिकां रन्ध्रमांध्री गिरीणां
दीनां दरभङ्गिमङ्गी रचयति शिथिला मैथिली त्वत्प्रकोपे ॥२८॥

अन्धा गन्धारभूपाः प्रतिपदमभवन् पार्वता गर्वहीना-
श्चीना[:]सीनाश्च लीना गिरिवरविवरे कच्छसंस्थास्तु कच्छाः।
मौरङ्गा मुक्तसङ्गास्त्वयि नृप कुपिते दर्भदन्ता विदर्भा
रङ्गा लङ्काधिनाथाः सुरपतिसदने वेपमानाः सुराश्च ॥२९॥

निर्याता रतिमन्दिरान्नहि बहिः शीतांशुना येन्दु[ना]
नो दृष्टा[1] नृप या कदापि न पुनस्पृष्टापि तालानिलैः।
सैवाकर्ण्य भ[2]वद्गविपक्षरमणी त्वद्गजैत्रयानं प्रभो
यातुं काननमन्धकारगमनं गेहान्तरभ्य[3]स्यति ॥३०॥

इहारण्ये मन्येऽवनिरमण ते वैरिवनिता-
गता नूनं भृङ्गा यदधरसुधामोदमुदिताः।
सरोजं नेहन्ते वदनसुष[4]मामग्नमनसो
न चेन्दुं सेवन्ते शिव शिव चकोराः पुनरमी ॥३१॥

स्मितश्रीर्मुक्तौघो दशनततयो हीरकगणाः
सुरोमाली नीलो मणिरपि च माणिक्यमधरः।
कुचौ हैमौ[5] कुम्भौ भवदरिवधूनामिति वने
नृप प्राचीनश्रीस्त्वदरिसदनान्नापसरति ॥३२॥

आकीर्णा महि[6]षीशतैर्मणि[7]धरैर्नागैर्द्विजानां गणै-
र्भू[8]भृद्भिर्वनखण्डिभिश्च कुतुकाक्रान्ताः शिवाक्रोशनैः।
तुष्टाश्छत्रपरंपराभिरभितो धात्रीफलालम्बिनः
कान्तारेष्वपि भूपते[नृपगणा[9] राज्यश्रियं भुञ्जते ॥३३॥

1 M. दृ। 2 M. ब। 3 M. घ्य। 4 M. ख। 5 M. ह्यौ। 6 M. ही। 7 M. अतः परं गणै इत्यधिकम्। 8 M. भू। 9 M. गुणा।

अश्वत्थामातिभीता हरिवरसहिताः संवृताश्चार्जुनाद्यै-
र्भीष्मग्रीष्मार्तचित्ता नकुलवलयुषो वर्मसन्तानरक्ताः ।
दैवासक्ता हि भीमाकृतिहत[1]मतयः पाण्डुपुत्रानुरूपा
गुप्ता द्रोणद्विषस्ते नृप तव रिपव[:] सन्ति कान्तारभागे ॥३४॥

कोदण्डे भुजदण्डवर्तिनि शरे क्षोभाकरे योजिते
प्रोद्यत्खाण्डवदाह-पाण्डववलद्गाण्डीव-संस्मारिणि ।
भूजाने भवता शिशूनपि परित्यज्यारयस्ते गता
गाढं काननमेष कृष्णहरिणो यातो द्विजेशालयम् ॥३५॥

वीर त्वद्भुजदण्डमण्डितवलत्-कोदण्ड-सन्निःसरत्-
काण्डा भान्ति गजेन्द्रभालपटलेष्वापत्स्व[2] मग्ना अमी ।
खड्गाघातविदीर्णभालविगलत्कुम्भान्तरप्रोल्लस-
न्मुक्ताखण्डततीषु तण्डुलधिया प्रोद्यत्-कपोता इव ॥३६॥

श्रान्ताः कान्तारवर्त्मन्यवनिवर भवद्वैरियोषा ह्यशेषा
दोषानाथोदये सत्यतिविकलहृदोऽन्योन्यमित्यालपन्ति ।
भिन्द[3]न्मर्माणि कालानलतुलकिरणैर्लोहितै रोहिताङ्गः
सोऽयं शूरोऽस्मदीयै रणभुवि पतितैर्भिन्नहृन्नो वतैति ॥३७॥

कान्ताः कान्तारयातास्तनयविरहिता हा गता वाजिराजि-
र्नागागारे शृगाला बत हतशशकाः कोशदेशे वसन्ति ।
पश्यन्ति त्वद्रिपूणामिति निजदुरितं भुं[4]जतां भूमिजाने
रेखाशेषं किमेते घन[5]वनविटपाः[6] पाटयन्तो ललाटम् ॥३८॥

त्वत्कीर्त्याऽवनिपालमौलिमुकुट प्रोते त्रिलोकीतले
त्यक्ताः काचधियेन्द्रनीलमणियुङ्माणिक्यमाला गलात् ।
पश्यन्त्या रिपुकान्तया कचचयं जातं निजं पाण्डरं
लज्जामन्थरयाऽथ केलिसदनान्निर्यातुमालम्बितम् ॥३९॥

युष्मद्वैरिमहीभृतामनुदिनं कान्तारसञ्चारिणां
किं किं नोपकृतं बतावनिपते युष्मद्यशोराशिना ।
वासः प्रोज्ज्वलितं तमः प्रदलितं कुञ्जं च सौधीकृतं
मन्ये देहगतं रजोऽपि सहसा पाटीरपङ्कीकृतम् ॥४०॥

---

1 M. कृतघ्नति । 2 ष्वापुङ्ख इति स्यात् । 3 M. भिद्य । 4 M. भु । 5 M. धन
6 M विपटपाः ।

यद्द्वारि द्विरदावलीवलयितद्वारद्विजानां गणः
प्रागासीदवनीश तेषु च वनीं यातेषु ते वैरिषु ।
तत्सौधाग्रनिरूढदर्भनिकरच्छायोदरो दैवतो
जातोऽसौ द्विजनायकोऽद्य नितरां लोके कलङ्काङ्कितः ॥४१॥

मिथ्याकर्ण्य प्रयाणं नृप तव रिपवः सम्परित्यज्य कान्ता
याताः कान्तारमन्तस्तदनु च परितो हन्त तत्कामिनीनाम् ।
निश्वासप्रौढवातैर्विरहहुतवहैर्नेत्रनीरापगाभि-
स्तत्त्वे ज्ञातेऽपि तेषां निजपुरगमनं दुर्लभं सम्बभूव ॥४२॥

नो कान्ता-हृदयं स्पृशन्ति कठिनं त्वत्कुम्भि-कुम्भभ्रमा-
न्नालिङ्गन्ति सुपीवरोरु च भवद्वेतण्ड-शुण्डाभिया ।
वेणीमानमयंति [नो न]रपते श्रीमत्कृपाणीधिया
भ्रूयुग्मं न विलोकयन्ति भवतः कोदण्डभीता नृपाः ॥४३॥

वक्षोजं यान्ति भृङ्गाः सरसिजमतितो बिम्बबुध्याऽधरान्तं[1]
कीरा[ः]सारङ्गशावाः करतलयुगले[2] पल्लवभ्रान्तिभाजः ।
केशोपान्तं च काकाः सुललितलपितैः कोकिलभ्रान्तिमन्तः
कान्तारेऽपीति तापं नृपवर भवतो वैरिकान्ताः प्रयान्ति ॥४४॥

कान्ते पूर्णेन्दुपूर्णे प्रविलसति सरो द्योतमानेऽपि पद्मे
युक्तं सद्मह नेति(?)प्रवदति विहगे चक्रवाकी तमाह ।
एने त[3] क्वापि हीना तव[4] हिमकिरणाः सन्ति किं तेन बाले
पानीयं पातुमेधो[5] गत इति भवतो वैरिकान्ताश्च वादः ॥४५॥

युष्मद्वैरिमृगीदृशां मृदुपदस्पर्शादभून्निश्चलः
शैलः[6] शाद्वलकैतवात् सपुलकः स्विन्नः श्रवन्निर्झरैः ।
इत्यालोच्य लता नु सापवलिता मन्दानिलान्दोलिता[7]
तत् किं संप्रति[8] ताम्यति प्रतिदिनं रोषा[9]च्छिरो धुन्वती ॥४६॥

श्वसन्त्यः प्रस्विन्नाः शिथिलवपुषस्तान्तनयना
गलद्वेणीबन्धास्तरलितनितम्बाम्बरयुषः[10] ।
समीहन्ते वातं गिरिशिखरसंरोहसमये
तवारीणां कान्ताः क्षितिप विपरीते[11] बत विधौ[12]॥४७॥

---

1 M. रातं। 2 M. ल। 3 'एणेन'इति स्यात्। 4 'वत' इति स्यात्। 5 'पातुमेणो' इति स्यात्। 6 M. ल। 7 M. तः। 8 M. दि। 9 M. शे। 10 M. धः। 11 M. रे। 12 'रतविधावि'ति सम्भविते पाठेऽप्यर्थसंगतिः स्यात् सामर्थ्यादिवार्थलाभात्।

भास्वन्माणिक्यकान्तं[1] विलसति पुरतः कार्मुकं वार्मुचो वा
विद्युल्लेखाऽथवैषा कलयतु वनिता[2] कांचनी वापि वल्ली ।
सम्पत्तिश्चम्पकानामतिशयरुचिरा शारदी चन्द्रिका [वा]
कान्तारान्ते नृपवं[3] भवदरिदयितां दूरतस्तर्कयन्ति ॥४८॥

मुखं चन्द्रभ्रान्त्या मृगशिशुधिया लोचनयुगं[4]
हरिभ्रान्त्या मध्यं करिवरधिया मन्दगमनम् ।
अरण्ये भूपाल त्वदरिदयितानां हि शवरै-
र्न विज्ञातं दैवात् करतलयुगं पल्लवधिया ॥४९॥

चकोराणां चेतः प्रमदयति नूनं तव दृशां
तिरोधत्ते तापं मलिनयति पङ्केरुहमहः ।
तमस्तोमं तावत्[5] प्रशमयति भूमीश हरितां
त्वदीयप्रस्थाने रिपुयुवतिवक्त्रं वनगतम् ॥५०॥

मुहुर्मूर्छा शैत्यं मुहुरपि च तापं मुहुरथ
प्रलापं प्रस्वेदं बत वदनकान्तेः प्रतिहतिम् ।
प्रकम्पं चोन्मादं तव रिपुगणानां नरपते
प्रयाणप्रस्तावो विरचयति शीतज्वर इव ॥५१॥

सुभक्ते विद्वेषो विलसति जडे प्रीतिरधिका
रुचिर्नो कुत्रापि प्रभवति गुरुर्लंघनविधिः ।
परीतापो[6] नित्यं वपुषि वदने चापि कटुता
तवारीणां राजन्निति भवति नित्यं ज्वरदशा ॥५२॥

नाम्भोजं भजते समुज्झति पुरः पाटीरपङ्कं पदा
कर्पूरं च न दूरतोऽपि सहते नालम्बते मालतीम् ।
इन्दुं निन्दति मन्दमारुतमपि प्रद्वेष्टि रेवाभवं
देवाद्यापि भवद्विपक्षवनिता कान्तेन विश्लेषिता ॥५३॥

स्नाता मेघजलैः स्खलत्यथ पदे प्राकृष्टदूर्वाङ्कुर-
व्याजेनात्तकुशा गलत्-कचमिषेणोर्णामिलत्पाणयः ।
भूपाल त्वदरातिराजवनिताः सत्कज्जलैरश्रुभिः
प्रेताय प्रतिकाननं सह तिलैर्यच्छन्ति तोयाञ्जलिम् ॥५४॥

---

1 M. कान्ति । 2 M. अतः परं 'ललिता' इत्यधिकम् । 3 M. तेनृपे कांतारं । 4 M. युतमं । 5 M. रत् । 6 M. तापं ।

युष्मद्वैरिमृगीदृशो वनभुवि प्रस्थानभीता भृशं
पातुं वारि सरोवरेषु परितो याताः पिपासावशाः ।
निश्वासानिलशोषितेषु भुवनेष्वासामहो मूर्च्छने
तत्रास्त्रैः शवरीभिराशु सरितः सम्पादिता भूपते ॥५५॥

देव श्रीमत्-प्रयाणप्रचलितजलधिप्रोच्छलद्वीचिचेलै-
र्मैनाके मौक्तिकादौ जलचरनिकरे तद्वहिः पातितेऽपि ।
श्रीमद्वाजीन्द्रवृन्दप्रचलनबहुधोद्धूतधूलीभिरन्धो
देवेशो नैव शैलं कलयति न परे मौक्तिकादीनि चान्धाः ॥५६॥

निराहारा निद्राव्यसनजयिनो [1]वल्कलधरा
जटाटोपोपेताः शिव शिव शयानाः क्षितितले ।
चिरं चित्ते चिन्तां विदधति विपक्षक्षितिभुजो
महाराजारण्ये मुनिजनसमाना[2]व्यसनिनः ॥५७॥

न दुर्गायां भर्गे न च पुनरहो स्वर्गजनके
नवा नैजे वर्गे न च विषमदुर्गेष्वपि न वै ।
न देवानां सेवास्वपि भजति भक्तिं तव रिपु-
र्निजत्राणे दन्ते तृणमिह[3] निदानं हि तनुते ॥५८॥
जाने श्रीमत्-प्रयाणे तुरगवरखुरव्रातघात[4]प्रकीर्णे
धूलीवृन्देऽतिमन्दे दिनकरकिरणे संवृतांशौ हिमांशौ ।
लोका नो केऽपि विद्युः किमपि हि नृपते वस्तुजातं यदीह
श्रीमत्प्रौढ-प्रताप-प्रतरणि[5]रथ ते कीर्तिचन्द्रश्च न स्यात् ॥५९॥

विशन्त्यः कान्तारे बत जघनभारेण विवशा
द्विषत्कान्ताः श्रान्ताः कचमधि गृहीताश्च विटपैः ।
प्रतापैरापीतास्तव जलधयो लोचनजलै
रुदन्तीभिस्ताभिर्नृप सपदि पूर्णाः पुनरपि ॥६०॥

तेषां द्वारि वसन्ति खण्डितवहा[6] भूमीशयानाश्च ते
सीत्काराञ्चितलोचनां वरतनुं स्वीयां समालिङ्गिताः ।
ते नागेन्द्रवृता निरन्तरबलद्वारावकीर्णाश्च ते
नेक्षन्ते विटपाञ्चितां वरतनुं त्वद्वैरिणस्त्वत्समाः ॥६१॥

---

1 M. न। 2 M. न। 3 M. मिह। 4 M. व्राततघत। 5 M. रिणि। 6. खड्गिनिवहा इति स्यात्

निजाङ्के पर्यङ्के दिशि दिशि च पङ्केरुहदृशो
भवन्तं संकेतेष्वपि सुभग पश्यन्ति परितः ।
तथाऽन्ये राजानस्तव विषमदण्डार्त[1]मनसो
न जाने भूजाने त्वमसि किमु कामः किमु यमः ॥६२॥

उत्कीर्णायान्तुरङ्ग-प्रकरखुरवरैराप्लुतायां समन्ताद्-
वीराणां[2] शोणितौघैरथ रणपतितैः पाणिभिः पवित्रितायाम् ।
राजन् वेतण्डगण्डप्रदलनगलितैर्मौक्तिकैः पुष्पितायां
जातं संग्रामभूमौ फलमपि भवतः पाणिवल्ल्यां जयश्रीः ॥६३॥

[द]गंभोजे लक्ष्मीर्निवसति महीपाल भवतो
धराप्येषाऽशेषा विलसति भवत्पाणिकमले ।
इतीवायं शौरिर्निरुपमवधूयुग्मरसिको
भवत्स्वान्ते कान्ते निरवधि निवासं वितनुते ॥६४॥

संकल्पेऽनल्पहेम्नां स्थित[3]वति भवति क्षापते वेपमाने
हेमाद्रौ देववासाः प्रचकितमनसो जातमानावसानाः ।
आलिङ्गन्त्यो नितान्तं तरलितनयनाः स्वस्वकान्तं समन्तात्
पान्तु त्वां भीतिमुक्ता निजपति-विहिता-श्वासनै[4]र्मोदमानाः ॥६५॥

सत्पद्मोन्नतिमातनोषि भजसि प्रीतिं गुरौ सर्वदा
देवाशाः परिपूरयन् निजकरैर्दैन्यं तमो लुम्पसि ।
आधत्से द्विजचक्रमोदनविधिं चित्रं परन्तु प्रभो
स्वच्छन्दं कुमुदोन्नतिं वितनुषे धत्से कलाश्चामलाः ॥६६॥

... ...
फुल्लांभोजमयं विभाति सकलं किं चापि मल्लीमयम् ।
... ... भूपते
कीर्तिः कापि तनोति चित्ररचनां भूमण्डलाखण्डल ॥६७॥

देवे साधयितुं समीहति[5] भृशं दैन्येन[6] शून्याशना-
नब्धिर्निम्नतरो बभूव नितरां रत्नव्ययाशङ्कया ।
तूर्णं स्वर्णगिरेः प्रयाति परितश्चंडद्युतिर्यामिकः
प्रालेयाचलमाविवेश धनपो रौप्याद्विरन्ध्रं तमः ॥६८॥

---

1 M. र्तिं । 2 M. यां । 3 M. क्षत । 4 M. स्वाशनै । 5. 'समिच्छति' इति युक्तम् । 6 M. वेन ।

२ 015.1 N46
SANSKRIT 9974 TIRUPATI
08974

भूपालाः कति नापरेऽवनितले जाताः परन्तु प्रभो
सेयं भाति वसुन्धरापि भवता त्यक्तैककर्णप्रथा ।
तन्मन्ये क्षितिपालशेखरमणे रत्नैरलं सत्कृता
संगम्येह भवन्तमेव हि पृथोः शोकं जहौ मेदिनी ॥६९॥

अहो नायं क्षीणो हरिणपरिहीनोऽथ सततं
चकास्ति प्रच्छन्नो न च भवति राहोर्न जलदात् ।
समन्तात् प्रोदेति द्विजवरचकोरान् पुलकयन्
यशश्चन्द्रः सान्द्रो जयति तव दानाम्बुधि-भवः ॥७०॥

त्वत्खड्गाशनिना नितान्तमभितः संभिन्नपक्षा भृशं
भीता वैरिमहीभृतो नरपते याताः समुद्रोदरे ।
सम्यग्दुष्टबल[1]प्रमर्दनपटोऽसद्वृत्र[2] विद्रावण
श्रीमद्भूसुरभूपितेश कलये नूनं धरेन्द्रो भवान् ॥७१॥

सम्यक् पालयसे वृषं वितनुषे भृतिं भज[3]स्यष्टभृन्-
नागान् धार[4]यसे सदा स्थिरचितां कीर्तिं च धत्से शुभाम् ।
ऐश्वर्यं विपुलं दधासि तनुषे बाणोन्नतिं लीलया
चन्दोद्भासि ... ...
... ...
... ... नतु भवति कस्याप्युपकृतौ ।
तव श्रीर्विश्वेषामुपकृतिरसावेशिततया
नृपालैषा केषां भवति गणिकेवेह न मुदे ॥८०॥

देवाकर्णय वर्णयामि ललितं कर्णेति वर्णद्वयं
तावत् कर्णगतं बभूव विदुषां दानप्रसङ्गे भुवि ।
युष्मद्दान[5]परम्परा[6]विवरणप्रोद्यत्सुवर्णैरलं
भूमीकान्त परन्तु कर्णकुहरं यावन्न पूर्णं किल ॥८१॥

युष्मत्खड्गानुपात-प्रदलिततुरगोन्मत्तमातङ्गमांसै-
र्मज्जाभिः शोणितौघैर्मुहुरपि जठरं पूरयन्ती वमन्ती ।
चण्डीशं मण्डयन्ती रणभुवि तरसा वीरमुण्डावलीभिः
काली तालीभिरालीकुलपरिमिलिता ताण्डवं सन्तनोति ॥८२॥

1M. वलि । 2M. द्वत्त । 3M. भव । 4M. चोर । 5M. तु । 6M. पए ।

प्रोद्गच्छद्वाजिवृन्दे रणभुवि रजसा योगतो देव मन्ये
स्नाता कुम्भीन्द्र[1]कुम्भस्थलगलदसृजां निर्झरेषु स्फुरन्ती ।
सङ्गम्याभूत् सगर्भा तव भुजभुजगे[2] त्वत्कृपाणी भुजङ्गी
सूतेऽण्डानीव[3]मुक्ता निपतनमिषतो हुंकृतैः कुन्थतीव ॥८३॥

द्विषद्भूपालानां बत नकुलविद्वेषरहितो
मणेर्मन्त्रादेर्वा न खलु परतन्त्रः कथमपि ।
समश्नाति प्राणानहह पवमानानरिगता-
नपूर्वोऽयं व्यालो नृपतिकरवालो विजयते ॥८४॥

देव त्वत्करवर्ति-निष्कृपकृपाणेन द्विषन्मूर्धतो
वाला मुक्तिपदं वताम्बरमपि(?) पृथ्वीतलं प्रापिताः ।
किञ्च त्वद्रिपुकुम्भिकुम्भदलनान्मुक्ताश्च रक्ताः कृता
दैवेन प्रतिकूलवर्तिनि विधौ किंवा[4] भवेन्नान्यथा ॥८५॥

वाजी तेऽवनिनाथ वायुविजयी जेतुं प्रयाति प्रभो
यन्नोच्चैःश्रवसं दिवं प्रति परं तत्तातसङ्कोचतः ।
वोढाऽसौ भगिनीपतेरिति विदन्नो याति नागान्तकं
धात्रीत्याकलयन् भुवि प्रचलितुं सङ्कोचमेवाञ्चति ॥८६॥

कियान् भूभागोऽयं जलधिसहितो लङ्घनविधौ
ममेत्येवं जानन् नृपवर हयस्त्वद्भुतरयः ।
समुत्फालं तन्वन् वियति हि धरायामुपगतो
मुहुष्टापव्याजात् कलयति धराऽस्तीह न हि वा ॥८७॥

त्वद्वेतण्डैः प्रच[ण्डै]र्जलधरपटलीं पाटयद्भिः प्रकाण्डैः
शुण्डादण्डैरमन्दस्वनपरिकलिताखण्डलेभप्रकुतैः(?) ।
मन्ये भूमण्डलेश प्रचकित-हययुङ्मण्डलाकृष्टिभीतो
वामाद्वा दक्षतो वा तदयनपदवीं[5] याति मार्तण्डदेवः ॥८८॥

धावत्सु त्वदिभेषु भूधरवराः संजात[6]पक्षा अमी
धावन्तीति धरापुरन्दर पुरे भूयानभूत्[7] सम्भ्रमः ।
तच्चालोच्य पुलोमजाप्रणयकृद्दम्भोलिजृम्भत्करो
भूपागत्य भवत्करीन्द्रकलनात् सङ्कोचमञ्चन् बभौ ॥८९॥

---

1 M. र। 2 M. जङ्ग। 3 M. सूतीण्डानाव। 4 M. स। 5 M. तदयनपदंवो। 6 M. जत। 7 M. भूयानभयानभूत्।

त्वद्वैतण्डवरा वहन्मदझराः प्रोद्दामदन्तोद्धुरा
हन्तुं यान्ति नरेश किं नु तरसा दिक्कुंजरान् कोपतः ।
इत्युत्तापवशेन मुग्धविधिनोपायान्तरावीक्षणात्
त्वत्प्रस्थानसमुत्थितेन रजसा दिग्दन्तिनो गोपिताः ॥९०॥

त्वदीय-प्रस्थान-प्रचलितसमुद्रोर्मि-निकरै-
र्भरायामार्द्रायां नृप सपदि दिग्दन्ति-निवहाः ।
तरङ्गौघैः स्नाता वपुषि पुनरुद्धूलनविधिं
वितन्वन्ति श्रीमत्तुरगखुर-धूलीभिरभि[त]ः ॥९१॥

नेपालाचलपाल भालयसि किं काञ्चीपते दुर्मते
दूरे तिष्ठ ततोऽपि कच्छनृपते गच्छेह किं पृच्छसि ।
गन्धारेश किमन्धवत् प्रचलसि प्रासादमासादयन्
युष्म[द्व]द्वारि नृपानतौ विजयते दौवारिकोदीरितम् ॥९२॥

समन्ताद्वर्धन्त्या क्षितितिलक कीर्त्या प्रतिदिनं
विदीर्णं मे जीर्णं भवति भवनं भूतसदनम् ।
इतीवाहो धात्रा धरणिवर वित्रस्तमनसा
प्रकाण्डं ब्रह्माण्डं तव गुणगणैः स्यूतमखिलम् ॥९३॥

संख्यावन्तो भवन्तः क्षितिपतिमनसोऽणुत्वमेवं वदन्तो
युक्तं सूक्तं मदीयं किमपि च विलसद्वर्णमाकर्णयन्तु ।
यत्रेशो व्योमकेशो निवसति नितरां तन्महत्त्वं तथाऽन्ये
संकीर्णा नैव तावद् बहुविधविधयो वेदविद्यादयोऽपि ॥९४॥

सुरद्रुः स्वर्धेनुः क्षितितिलक चिन्तामणिवर-
स्त एते नाभिज्ञाः कथमपि सुविज्ञार्पणविधौ ।
कथं ब्रूमः साम्यं तव पुनरथैतेषु विदुषो
यथायोगं दातुर्निरवधिविनीतस्य कृतिनः ॥९५॥

सांकर्यं दुर्निवार्यं भवदरिभवने किंच साधारणास्ते
हन्तैतेषां कुलेषु[1] प्रभवति नितरां वर्णलोपो निपातः ।
दाक्षीपुत्राक्षपाद-प्रकटितनयतो दोषराशीनवेक्ष्य
युष्मद्विद्वेषिगेहादवनिप कमलाऽनल्पकोपादपैति ॥९६॥

1 M. वेषु ।

आक्रान्तुं देवराजं प्रचलति किमसौ चण्डरश्मि नु किं वा
मोक्तुं पातालमूलं वलिमुत धनदं[1] वाथ जेतुं प्रयाति ।
आदातुं दिक्करीन्द्रांस्तिरयितुमथवा शीतभानोः कलङ्कं
युष्मत्प्रस्थानमेवं नृप रिपुसुदृशः कम्पमाना वदन्ति ॥९७॥

त्वत्कीर्त्या परिपूरिते त्रिजगति प्राप्तेशभावः[2] प्रभो
लज्जाकुञ्चितशारदामनुसरत्यंभोजजन्मा बलात् ।
जायामुज्झति माधवोऽपि च हरौ वाणीधिया भूपते
श्रीगौर्योरपि सम्भ्रमः स्मरहराकारे हरौ जृम्भते ॥९८॥

भवद्रिपुनृपाङ्गनावदनपद्मसंमुद्रणं
यशस्तुहिनदीधितिस्तव तनोति युक्तं हि तत् ।
प्रतापतपनोऽपि यन्ननु तनोति तन्मुद्रणं
तवैतदवनीपते बत विचित्रमाचक्ष्महे ॥९९॥

चलच्चपलवाजिनां वरखुराभिघातादहो
प्रसर्पति भवद्बले दलितमौलिरत्याकुलः ।
सहस्रफणकैतवाद् व्रणपरम्परां धारयन्
धराधरणपुण्यतः फणिवरो हि जीवत्यसौ ॥१००॥

यशस्तुहिनरोचिषा तव तते महीमण्डले
लसत्कनककुण्डलं त्यजति कापि रूप्यभ्रमात् ।
स्वकाचमयभूषणं बत विलोक्य मुक्ताधिया
प्रियानुचरकामिनी भजति यामिनीशोदये(?) ॥१०१॥

त्वत्-प्रतीप-रमणी-कुचोत्पले साञ्चना नयन-नीर-विन्दवः ।
देव सुन्दरमरन्द-लोभतो भान्ति हन्त मिलिता इवालयः ॥१०२॥

भूप तावक-विपक्षयोषितां हन्त कांचनमयाः कुचाञ्चलाः ।
काननेषु किल सन्ति सन्ततं पाणिपल्लवतलेन गोपिताः ॥१०३॥

विपिने भवदरिदयितामिति किल शवरा विलोक्य जल्पन्ति
तरुणारुणनयनेयं विचरति बत डाकिनी कापि ॥१०४॥

भवदसिपातितवीरैर्भिद्यन्मार्त्तण्डमण्डलं वीक्ष्य ।
युष्मत्तुरगरजोभिस्तत्प्रपिधानं तनोत्यसौ धाता ॥१०५॥

---

1 M. दधनं । 2M. मावः ।

निन्दति चन्दनमिन्दुं कमलं काशं[1] च मालतीं मल्लीम् ।
विचरति सागरपारे भवदरिकान्तेव ते कीर्तिः १०६॥

भूप त्वत्करवाल-प्रदलितकरिकुम्भमापतद्रुधिरम् ।
मुक्ताभिर्ननु मन्ये दशनलसत्कालिकावदनम् ॥१०७॥

नूनमियं यमदंष्ट्राविदलित-वेतण्डगलिताभिः ।
विलसति विकसितदशना युक्ता मुक्ताभिरर्धविद्धाभिः ॥१०८॥

परितस्ताराकारैर्मुक्ताजालै[र्ल]सदम्बरं वीक्ष्य ।
त्वत्कीर्ति-चन्द्रशिशवः खेटकमवलम्ब्य खेलन्ति ॥१०९॥

मूकः सुरतरुरिन्दुः कलयति गरलं कलङ्ककपटेन ।
चिन्तामणिरपि लीनो विलसति नृपते यशःशशिनि ॥११०॥

आ समुद्रा[न्]मही भाति सभद्रा तव मुद्रया ।
भूप विद्रावितक्षुद्रनृपोपद्रवमुद्रणैः ॥१११॥

मता कल्पलताऽप्यल्पा विक्रमः क्रमितो नहि ।
कर्णो न वर्णितः सद्भिः सुवर्णद भवद्गुणैः ॥११२॥

प्रत्यक्-पूर्वाद्रि-शिखरग्रथनाद् यशसा तव ।
विरञ्चिना विरचिता मन्ये वन्दनमालिका ॥११३॥

चकोरा इव चन्द्रस्य चातका इव वार्मुचः ।
भावयामो वयं भूप भव्यमव्याहतं तव ॥११४॥

मन्दो दिनकरो देव त्वत्प्रतापरवेः पुरः ।
त्वत्कीर्ति-चन्द्रपुरतः कृष्णः कैरविणीपतिः ॥११५॥

त्वत्प्रतापानलैर्नूनं हैममण्डं द्रुतं भवेत् ।
भूपाल यदि ते न स्याद् यशस्तुहिनधोरणी ॥११६॥

दिवि कल्पलतैवास्ति पातालेऽपि बलिः किल ।
इतीव धाता दातारं देव त्वां भुवि निर्ममे ॥११७॥

चित्रं[2] न्यायनयज्ञो[3] नैव वितण्डां छलं च नो[4] वेत्सि ।
त्वं वेदांतविदेकं[5] मनुषे नो निर्गुणं भूप ॥११८॥

---

1 M. कासं । 2 M. चित्र । 3 M. च्च "से" इत्यधिकम् । 4 M. नोच्च । 5 M. देको ।

दानं समानं नृपते न समानं च केनचित् ।
छधाकरो भवान् भूप चित्रं दोषाकरो न यत् ॥११९॥

यशोदयालिङ्गिताङ्गः सद्वृन्दावनतत्परः ।
नरगोसाघविध्वंसी भवान्छौरिरिहापरः ॥१२०॥

छमित्रात्मजसङ्गोषा लङ्केशबलभञ्जनः ।
छग्रीवाङ्गदसम्प्रीतो रामवन्नृप राजसे ॥१२१॥

भयतस्तवारिकान्ता गिरिवरविवरेषु तमसि[1] विश्रान्ताः ।
त्वत्-कीर्ति-चन्द्रभीता भूप पुनस्तत्र मोहसंवीताः ॥१२२॥

वितरति तव करजलदे काञ्चनधारां प्रपूरिता ह्याशाः ।
उदिता च कीर्तिवल्ली दैन्यदवाग्निः शशाम भूकाम ॥१२३॥

भूप त्वदसिपयोदो भूभृत्मूर्धनि समाहतारम्भः
दलितारिकुम्भिकुम्भो वर्षति करकानुकारिमुक्ताभिः ॥१२४॥

मन्ये भूपाल विपुलस्त्वत्प्रासाद-हिमाचलः ।
ललितैः कांचनशृङ्गैः काञ्चनाद्रिं जयत्यसौ ॥१२५॥

खण्डिताः खल-भूपाला मण्डिताः किल पण्डिताः ।
रञ्जिताः छजना भूप[2] भञ्जिता भवताऽरयः ॥१२६॥

शतकं सदर्थरत्नैर्यत्नेनापा[3]दितंहि भूजानेः ।
राघववाचस्पतिना कविजनमनसो विनोदाय ॥१२७॥

इति श्रीराघवभट्टाचार्यविरचितं भूपशतकं समाप्तम् ॥

015.1
N46.
KENDRIYA SANSKRIT VIDYA PEETHA LIBRARY
9974
TIRUPATI.

1 अत्र 'f.' इत्यधिकम् । 2 M. नृप । 3 M. नासा ।